रोल नं.

228 (HFG)

028

# 2024

# संस्कृतम्

## (केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ] [ पूर्णांक :

निर्देश : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने एव लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्नसंख्या प्रश्नपत्रानुसारेण अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

### खण्ड - 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

शरीरस्य स्वस्थतायै व्यायामः आवश्यकः अस्ति। शरीरस्य अंगानां समुचित विकासः व्यायामेन एव भवति। व्यायामः बहुविधः भवति। विविधानि योगासनानि अपि व्यायामस्य अंगानि। मल्लविद्या प्राचीनकालादेव अस्माकं देशस्य एका महत्त्वपूर्णा व्यायाम विधा आसीत्। ग्रामेषु नगरेषु च अस्य प्रभूतं प्रचलनम् आसीत्। बालक-बालिकासु बाल्यकालादेव व्यायाममहत्त्वं प्रदर्शनस्य आवश्यकता अस्ति। अतएव विद्यालयेषु विविधाः क्रीडाप्रतियोगिताः पाठ्यचर्यायां सम्मिलिताः भवन्ति। सर्वदा व्यायामशीलः मनुष्यः स्वस्थः चिरायुश्च भवति। अतः अस्माभिः सदैव व्यायामः करणीयः।

(क) एक पदेन उत्तरत – 1×2=2

(i) शरीरस्य अंगानां समुचित विकासः केन भवति?

(ii) प्राचीनकालादेव अस्माकं देशे व्यायामस्य का विधा प्रचलिता आसीत् ?



https://www.ukboardonline.com

(ख) पूर्णवाक्येन उत्तरत- 1

(i) विद्यालयेषु पाठ्यचर्यायां काः सम्मिलिताः भवन्ति?

(ग) निर्देशानुसारम् उत्तरत - 1×2=2

(i) 'व्यायामशीलः मनुष्यः' अत्र विशेष्य पदं लिखत?

(ii) 'चिरायुः' इति पदस्य विलोमपदं लिखत?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

कश्मिश्चित् स्थाने एकः रजकः प्रतिवसति स्म। तस्य पार्श्वे एकः दुर्बलः गर्दभः आसीत्। सः रजकः कुतश्चित् व्याघ्रचर्मम् आदाय अचिन्तयत् - अनेन चर्मणा प्रच्छाद्य रासभं रात्रौ यव क्षेत्रेषु प्रेषयानि । एवं सति क्षेत्रपालाश्च तं व्याघ्रं मत्वा क्षेत्रात् न निष्कासयन्ति स्म। एकदा सः गर्दभः गर्दभानां ध्वनिं श्रुत्वा स्वयमपि गर्दभध्वनिम् अकरोत्। तं श्रुत्वा सर्वे क्षेत्रपालाः तत्र आगच्छन् तं गर्दभं मत्वा लगुडप्रहारैः हतवन्तश्च।

(क) एक पदेन उत्तरत - 1×2=2

(i) कस्य पार्श्वे एकः दुर्बलः गर्दभः आसीत्?

(ii) तं गर्दभं के हतवन्तः?

(ख) पूर्णवाक्येन उत्तरत - 1×2=2

(i) रजकः केन प्रच्छाद्य रासभं यवक्षेत्रे प्रेषितम्?

(ii) सः गर्दभः केषां ध्वनिं श्रुत्वा गर्दभध्वनिम् अकरोत्?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'निष्कासयन्ति स्म' अस्य क्रिया पदस्य कर्तृपदं किम्?

(ii) 'दुर्बलः' पदस्य विलोमपदं लिखत?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1

## खण्ड - 'ख' (रचनात्मकं लेखनम्)

3. एकः छात्रः अल्मोड़ा नगरे जवाहर नवोदय विद्यालये पठति। शैक्षिक भ्रमणाय अनुमतिं धनराशिं च प्राप्त्यर्थं सः पितरं प्रति पत्रं लिखति। तं लिखितं पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत-

| **मञ्जूषा** - अनुगृह्णन्तु, शैक्षिकभ्रमणं, प्रणमामि, परीक्षा |
|---|

1×4=4



https://www.ukboardonline.com

छात्रावासः

जवाहर नवोदय विद्यालयः

अल्मोड़ा

तिथि : - 12.11.2023

आदरणीयाः पितृवर्याः

सादरं ----------।

इतः पूर्वं भवतः पत्रं प्राप्तम् । मम------------------------शोभना सम्पन्ना। विद्यालयतः एकं------------ कर्नाटकराज्ये गमिष्यति। अतः कृपया स्वानुमतिं धनराशिं च प्रेषणेन माम् ----------। सर्वेभ्यः मम प्रणामः निवेदनीयः।।

भवताम् पुत्रः

क ख ग

दशम कक्षा

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत – 1×4=4

| **मञ्जूषा-** रमणीया, उद्यानम्, योगाभ्यासम् , गुञ्जन्ति |
|---|

मुदिता – एतत् ...........अस्ति।

सुपर्णा – उद्यानस्य शोभा अतीव ............अस्ति।

मुदिता – पुष्पेषु भ्रमराः ..................।

सुपर्णा – सखि पश्य! अत्र जनाः भ्रमणं .........................चापि कुर्वन्ति।

5. 'वन महोत्सवम्' इति विषयम् अभिलक्ष्य मञ्जूषातः शब्द चयनं कृत्वा **चत्वारि** वाक्यानि उत्तरपुस्तिकायां लिखत- 2×4=8

| **मञ्जूषा -** अस्माकं विद्यालये, मुख्यातिथिः, बान्धवाः, वृक्षारोपणं, वृक्षं विना, पर्यावरणं, प्रदूषणं, वनशोभा |
|---|

**खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)**

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं / सन्धि-विच्छेदं च कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) तथापि वृषः <u>न + उत्थितः</u>।

(ख) <u>विचित्रोऽयं</u> संसारः।

(ग) सर्वेऽपि <u>न + एतादृशाः</u>।



https://www.ukboardonline.com

7. रेखांकितपदेषु समासं / समास विग्रहं कृत्वा लिखत– 1 × 3 = 3

(क) तेन तत्त्वार्थस्य निर्णयः कृतः।

(ख) सः महात्मा आश्रमे निवसति।

(ग) यथाशक्ति कार्यं करणीयम् ।

8. रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत- 1 × 3 = 3

(क) पुरस्कारं लभ् + क्त्वा सः आगच्छत् ।

(ख) तेन नाटकं दृश + क्त।

(ग) परमात्मा एवं सर्वशक्ति + मतुप् अस्ति।

9. मञ्जूषायाः सहायतया निम्नलिखितानि वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत- 1 × 3 = 3

(क) छात्रः -----------विद्यालयं गच्छति

(ख) त्वम् ---------तिष्ठ।

(ग) -------------झंझावातः आगतः।

| मञ्जूषा - सहसा, शनैः शनैः, अत्र |
|---|

10. अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत- 1 × 3 = 3

(क) त्वं किं करोषि?

(ख) बालिकया गीतं गीयते।

(ग) जनाः नाटकं पश्यन्ति।

11. घटिकां दृष्ट्वा संस्कृत पदेषु समयं पूरयित्वा वाक्यानि उत्तरपुस्तिकायां लिखत- 1 × 4 = 4

(क)



4:30 अपराह्ने

(ख)



5:45 सायं

(ग)



9:00 रात्रौ

(घ)



10:15 रात्रौ

(क) सुभाषः अपराह्ने ----------वादने क्रीडनाय गच्छति।

(ख) सुभाषः सायं -------- वादने गृहम् आगच्छति।

(ग) सः रात्रौ --------- वादने भोजनं करोति।

(घ) रात्रौ ------------वादने शयनाय गच्छति।



https://www.ukboardonline.com

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणेन रिक्तस्थानपूर्तिः संस्कृतेन कृत्वा पुनः उत्तर पुस्तिकायां लिखत- 1×2=2

(क) ज्योतिषशास्त्रानुसारे (27) ········ नक्षत्राणि भवन्ति।

(ख) सामान्यतः मानवस्य आयुः (100) ······· वर्षाणि भवति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत- 1×3=3

(क) अयं बालिका मधुरं गायति।

(ख) त्वं स्व कार्यं कुरुत।

(ग) छात्राः शैक्षिकभ्रमणाय गच्छतः।

## खण्ड - 'घ' (पठित अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत -

कश्चित् कृषकः वलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः वलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्। तथापि वृषः नोत्थितः।

(क) एकपदेन उत्तरत- https://www.ukboardonline.com 1

(i) वलीवर्दः केन कारणेन जवेन गन्तुमशक्तश्चासीत् ?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) कृषकः वलीवर्दाभ्यां किं कुर्वन्नासीत् ?

(ii) कः क्षेत्रे पपात?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'दुर्बलं वृषभम्' अत्र विशेष्य पदं किम् ?

(ii) गद्यांशे 'पपात' क्रियायाः कर्ता किम् ?



https://www.ukboardonline.com

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

उदीरितोऽर्थः पशुनापि गृह्यते

हयाश्च नागाश्च वहन्ति बोधिताः।

अनुक्तमप्यूहति पण्डितो जनः

परेङ्गितज्ञानफला हि बुद्धयः।।

(क) एकपदेन उत्तरत- 1

(i) उदीरितोऽर्थः केन गृह्यते?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) बोधिताः के वहन्ति?

(ii) बुद्धयः कीदृशाः भवन्ति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'वहन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'उक्तम्' इति पदस्य विलोम पदं पद्यांशे किम् ?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

सिंह. – (क्रोधेन गर्जन्) भोः! अहं वनराजः, किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि, तर्हि कथमस्मान् रक्षिष्यसि?

अन्यः वानरः– किं न श्रुता त्वया पञ्चतन्त्रोक्तिः -

यो न रक्षति वित्रस्तान् पीड्यमानापरैः सदा।

जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः।।

काक : – आम् सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।



https://www.ukboardonline.com

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र-तत्र का-का इति कर्कशध्वनिना वातावरणमाकुली करोषि। न रूपं न ध्वनिरस्ति।

(क) एकपदेन उत्तरत- 1

(i) कः स्वरक्षायामपि समर्थः नास्ति?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) यः वित्रस्तान् न रक्षति सः कीदृशः भवति?

(ii) कः कर्कशध्वनिना वातावरणमाकुली करोति?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) **'त्वं वनराजः भवितुं सवर्था अयोग्यः' अत्र त्वं पदं कस्मै प्रयुक्तम् ?**

(ii) **'राजा तु रक्षकः भवति' अत्र भवति क्रियापदस्य कर्तृपदं किम् ?**

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) विचित्रे खलु संसारे नास्ति किंचित् निरर्थकम् ।

अश्वश्चेद् धावने वीरः भारस्य वहने खरः।। ½×4=2

**भावार्थ :-**

**अस्मिन् संसारे किञ्चिदपि ......... नास्ति । यदि........................ धावने...........तत्...............भारस्य वहने वीरः भवति।**

(ख) एकेन राजहंसेन या शोभा सरसो भवेत् ।

न सा बकसहस्रेण परितस्तीरवासिना।। ½×4=2

**भावार्थ :-**

एकेन........सरोवरस्य या ........ भवतिः सा शोभा परितः ................ सहस्रेण बकेन न ..................।

18. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च ।। ½×2=1

**अन्वय :-**

यः आत्मनः श्रेयः प्रभूतानि सुखानि च ..........। सः कदापि.......अहितं कर्म न कुर्यात्।



https://www.ukboardonline.com

(ख) प्राणिनां जायते हानिः परस्परविवादतः।

अन्योन्य-सहयोगेन लाभस्तेषां प्रजायते ।। ½×2=1

**अन्वय :-**

परस्परविवादतः ..........हानिः जायते। अन्योन्य सहयोगेन..........लाभः प्रजायते।

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत – ½×4=2

(क) शकटीयानं कज्जलमलिनं धूमं मुञ्चति।

(ख) त्वं मानुषात् विभेषि।

(ग) सुराधिपः ताम् अपृच्छत् ।

(घ) भूकम्पविभीषिका कच्छजनपदं ध्वंसावशेषेषु परिवर्तितवती।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×6=3

(i) भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् ।

(ii) सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

(iii) अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत।

(iv) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।

(v) सुरभेः इमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् ।

(vi) लोकानां पश्यताम् एव सर्वत्र जलोपप्लवः सञ्जातः।

21. निम्नांकित शब्दार्थानां मेलनं कुरुत - ½×4=2

| **शब्दः** | **अर्थः** |
|---|---|
| दुर्वहम् | सूर्यः |
| तूर्णम् | दुष्करम् |
| अनृतम् | शीघ्रम् |
| सहस्रदीधितिः | असत्यम् |

*****

https://www.ukboardonline.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से



https://www.ukboardonline.com